**CLASS : 12th** (Sr. Secondary) **Code No. 1252**

**Series : SS/Annual Exam.-2024**

*रोल नं०* | | | | | | | | | | |

# उत्तर मध्यमा सह वरिष्ठ माध्यमिक परीक्षा संस्कृत साहित्य वेद सिद्धान्त (परम्परागत संस्कृत विद्यापीठ)

**Sub Code : 1204/SSA**

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **6** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/ पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देश :- (क) **सर्वे प्रश्नाः समाधेयाः।***

*(ख) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ग) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(घ) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः - 'क'**

**[ दीर्घउत्तरीय प्रश्नाः ]**

**1.** (क) शिवराजविजयग्रन्थस्य द्वितीयनिःश्वासस्य सारं लिखत। $6 \times 1 = 6$

**अथवा**

शिवराजविजयग्रन्थस्य कथासारं लिखत।

(ख) शिवराजविजयग्रन्थस्य पात्राणां परिचयं लिखत। $6 \times 1 = 6$

**अथवा**

शिववीरस्य जीवनपरिचयं लिखत।

(ग) श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्य सारं लिखत। $6 \times 1 = 6$

**अथवा**

श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्य भक्तियोगं विवृणुत।

**2.** अधोलिखितगद्यांशस्य सप्रसङ्गं व्याख्या कार्या - $6 \times 1 = 6$

महान्तो हि धर्मस्य कृते लुण्ठ्यन्ते, पात्यन्ते, हन्यन्ते, न धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वसुखान्यपि त्यक्त्वा निशीथेष्वपि, वर्षास्वपि, ग्रीष्मघर्मेष्वपि, महारण्येष्वपि, कन्दरिकन्दरेष्वपि, व्यालवृन्देष्वपि, सिंहसंघेष्वपि, वारणवारेष्वपि, चन्द्रहासचमत्कारेष्वपि च निर्भया विचरन्ति।

**अथवा**

शिववीरोऽपि कौशेयकञ्चुकस्यान्तर्लोहवर्म्म परिधाय, सुवर्णसूत्रग्रथितोष्णीषस्याऽप्यधस्तादाया-सं शिरस्त्राणं संस्थाप्य, सिंहनखनामकं शस्त्र-विशेषं करयोरारोप्य दृढबद्धकटिरपजलखान-साक्षात्काराय सज्जस्तिष्ठति स्म।

**खण्डः 'ख'**

[ **लघुउत्तरीयप्रश्नाः** ]

**3.** अधोलिखितश्लोकेषु ***पञ्चानां*** सप्रसंगं व्याख्या कार्या - 4 × 5 = 20

(क) अनन्यचेताः सततं यो मां स्मरति नित्यशः।
तस्याहं सुलभं पार्थ नित्यमुक्तस्य योगिनः।।

(ख) यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय सदा तद्भावभावितः।।

(ग) अक्षरं परमं ब्रह्म स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसञ्ज्ञितः।।

(घ) सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः।

(ङ) परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति।।

(च) नैते सृती पार्थ जानन्योगी मुह्यति कश्चन।
तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन।।

(छ) अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्।।

(ज) अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर।।

खण्डः - 'ग'

[ अतिलघुउत्तरीयप्रश्नाः ]

**4.** निम्नांकितगद्यांशं पठित्वा ***एकपदेन*** उत्तरत - 2 × 5 = 10

भगवन् सर्पाकारैरक्षरैः पारस्यभाषायां लिखितं पत्रमेतदस्ति। एतस्य सारांशोऽयमस्ति - विजयपुराधीशः स्वप्रेषितमपजलखानं सेनापतिं सम्बोध्य लिखति यत् - वीरवर ! महाराष्ट्रराजेन सह योद्धं प्रस्थितोऽसीति मा स्म भूत् कश्चनान्तरायस्तव विजये।

(क) "वीरवर !" इति पदेन कोऽत्र सम्बोधितः ?

(ख) पत्रस्य भाषा का अस्ति ?

(ग) अक्षराणामाकृतिः कीदृशी अस्ति ?

(घ) पत्रं कः प्रेषितवान् ?

(ङ) विजयपुराधीशस्य सेनापतिः क आसीत् ?

**5.** निम्नांकितपद्यं पठित्वा ***एकपदेन*** उत्तरत - 2 × 5 = 10

ओमित्येक्ष क्षरं ब्रह्म व्याहरन्मामनुस्मरन्।

यः प्रयाति त्यजन्देहं स याति परमां गतिम्।।

(क) "प्रयाति" इति पदस्य कोऽर्थः ?

(ख) उपर्युक्त श्लोकस्य वक्ता कः ? श्रोता च कः ?

(ग) किं प्रकारकं ब्रह्म व्याहरन् परमां गतिं याति ?

(घ) गतिमिति पदस्य विशेषणम् किम् ?

(ङ) श्लोकोऽयं कस्य ग्रन्थस्य कस्याध्यायस्य चास्ति ?

## खण्डः – 'घ'

### [ वस्तुनिष्ठप्रश्नाः ]

**6.** अधोलिखितप्रश्नानां समीचीनमुत्तरं चिनुत – $1 \times 16 = 16$

(i) रात्रिर्गमिष्यति भविष्यति सुप्रभातम् इत्थं कः विचिन्तयति ?

(क) गजः (ख) द्विरेफः

(ग) पंकजः (घ) नलिनी

(ii) स्कन्धे किं निधाय दौवारिकः पादक्षेपध्वनिमिवा-श्रौषीत् ?

(क) वेत्रम् (ख) धनुः

(ग) भुशुण्डीम् (घ) खड्गम्

(iii) दौवारिकाः कस्य आज्ञां शिरसा वहन्ति ?

(क) शिववीरस्य (ख) गौरसिंहस्य

(ग) संन्यासिनः (घ) ब्राह्मणस्य

(iv) सर्वं रसायनतत्त्वं के जानन्ति ?

(क) ब्राह्मणः (ख) क्षत्रियाः

(ग) संन्यासिनः (घ) वीराः

(v) संन्यासी वेशधारी क आसीत् ?

(क) गौरसिंहः (ख) शहाबुद्दीनः

(ग) रघुवीरसिंहः (घ) दौवारिकः

(vi) विजयपुरादुड्डीयात्रागच्छन्त्या कस्याः अन्तःस्थितिमपि विदन्ति ?

(क) चटकायाः (ख) मक्षिकायाः

(ग) शुकस्य (घ) मयूरस्य

(vii) कः निम्बतरुतलवेदिकायां सहचरं समुपविष्टवान् ?

(क) भिक्षुष्टुः (ख) शिववीरः

(ग) दौवारिकः (घ) गौरसिंहः

(viii) कुत्र गोपीनाथनामा पण्डितः श्रीमन्तं दिदृक्षुरूपण्तिष्ठते ?

(क) वने (ख) दुर्गद्वारि

(ग) गिरिकन्दरे (घ) नगरे

(ix) गीतायाः अष्टमाध्यायस्य नाम किम् ?

(क) ज्ञानयोगः (ख) कर्मयोगः

(ग) अक्षरब्रह्मयोगः (घ) सांख्ययोगः

(x) अक्षरं ब्रह्म परमं स्वभावो किमुच्यते ?

(क) अधिदैवतम् (ख) अधियज्ञम्

(ग) अध्यात्मम् (घ) अधिभूतम्

(xi) "अधियज्ञोऽहमेवात्र" इति अत्र अहमिति पदेन कोऽस्ति ?

(क) श्रीकृष्णः (ख) भीमः

(ग) अर्जुनः (घ) युधिष्ठिरः

(xii) अन्तकाले मामेव स्मरन् यः प्रयाति सः किं भावं याति ?

(क) तद्भावम् (ख) मद्भावम्

(ग) यद्भावम् (घ) स्वभावम्

(xiii) कमक्षरं वेदविदो वदन्ति ?

(क) परमम् (ख) विषमम्

(ग) समम् (घ) उत्तमम्

(xiv) "कौन्तेय" इति सम्बोधनं कस्मै प्रयुक्तम् ?

(क) कृष्णाय (ख) भीष्माय

(ग) अर्जुनाय (घ) संजयाय

(xv) अव्यक्ताद् व्यक्तयः सर्वाः कदा प्रभवन्ति ?

(क) रात्र्यागमे (ख) अहरागमे

(ग) सुखागमे (घ) दुःखागमे

(xvi) कया गत्या अनावृत्तिं याति ?

(क) शुक्लगत्या (ख) कृष्णगत्या

(ग) तीव्रगत्या (घ) सहजगत्या